This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

22

वेङ्केश्वर गोविंद बोल्प

कपालेश्वरा जवळ पंचवटी

Acc. NO. ~~857~~ M-1536
Title - वेदान्तसार
Author - सदानन्द
Date - A.D. 1797
Subject - वेदान्त
folio - 17
Xerox - 34

K K S U LIBRARY
RAMTEK
441 106
M-1536
Dist Nagpur

...cked 2012

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वे॰सा॰ श्रीगणेशायनमः॥ अखंडंसच्चिदानंदमवाङ्मनसगोचरं॥ आत्मानमखिलाधार
१ माश्रयेभीष्टसिद्धये॥१॥ अर्थतोप्यद्वयानंदानतीतद्वैतभावतः॥ गुरूनाराध्यवेदांत
सारंवक्ष्येयथामति॥२॥ वेदांतोनामोपनिषत्प्रमाणंतदुपकारीणिशारीरकसूत्रादीनि
च॥ अस्यवेदांतप्रकरणत्वात्तदीयैरेवानुबंधैस्तद्वत्तासिद्धेर्नतेपृथगालोचनीयाः॥
तत्रानुबंधोनाम। अधिकारिविषयसंबंधप्रयोजनानि। अधिकारीतु। विधिव
वेद दधीतवेदांगत्वेनापाततोऽधिगताखिलवेदार्थोऽस्मिन्जन्मनिजन्मांतरेवाकाम्यनि
षिद्धवर्जनपुरःसरंनित्यनैमित्तिकप्रायश्चित्तोपासनानुष्ठानेननिर्गताखिलकल्म
षतयानितांतनिर्मलस्वांतःसाधनचतुष्टयसंपन्नःप्रमाता। काम्यानिस्वर्गादीष्ट
साधनानिज्योतिष्टोमादीनि। निषिद्धानिनरकाद्यनिष्टसाधनानिब्राह्मणहनना १
रामः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दीनि। नित्यानि अकरणे प्रत्यवायसाधनानि संध्यावंदनादीनि। नैमित्तिकानि पुत्रजन्मा
द्यनुबंधीनि जातेष्ट्यादीनि। प्रायश्चित्तानि पापक्षयसाधनानि कृच्छ्रचांद्रायणादी
नि। उपासनानि तु सगुणब्रह्मविषयमानसव्यापाररूपाणि शांडिल्यविद्यादीनि।
एतेषां नित्यादीनां बुद्धिशुद्धिः परं प्रयोजनं। उपासनानां तु चित्तैकाग्र्यं प्रयोजनं।
तमेतं ब्राह्मणा वेदानुवचनेन विविदिषंति यज्ञेन दानेन तपसाऽनाशकेनेत्यादिश्रुतेः।
तपसा कल्मषं हंति विद्ययाऽमृतमश्नुते इति स्मृतेश्च। नित्यनैमित्तिकप्रायश्चित्तो
पासनानां तु अवांतरफलं। पितृलोकसत्यलोकप्राप्तिः। कर्मणा पितृलोको विद्यया
देवलोक इत्यादिश्रुतेः। साधनानि नित्यानित्यवस्तुविवेकेहामुत्रार्थफलभोगवि
रागशमदमादिषट्कसंपत्तिमुमुक्षुत्वानि। नित्यानित्यवस्तुविवेकस्तावत् ब्रह्मै
व नित्यं वस्तु ततोऽन्यदखिलमनित्यमिति विवेचनं। ऐहिकानां स्रक्चंदनादिवि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वे. सा. षयभोगानां कर्मजन्यतयाऽनित्यत्ववत्। आमुष्मिकाणामपि अमृतादिविष
२ यभोगानामप्यनित्यतया तेभ्यो नितरां विरतिरिहामुत्रार्थफलभोगविरागः॥ श
मादयस्तु शमदमोपरतितितिक्षासमाधानश्रद्धाख्याः॥ शमस्तावत् श्रवणा
दिव्यतिरिक्तविषयेभ्यो मनसो निग्रहः। दमो बाह्येंद्रियाणां तद्व्यतिरिक्तविषये
भ्यो निवर्तनं। निवर्तितानामेतेषां तद्व्यतिरिक्तेभ्यो विषयेभ्य उपरमणमुपरतिः
। अथवा विहितानां कर्मणां विधिना परित्यागः। तितिक्षा शीतोष्णादिद्वंद्वसहि
ष्णुता। निगृहीतस्यांतःकरणस्य श्रवणादौ तदनुगुणविषये च समाधिः स
माधानं। गुरुवेदांतवाक्येषु विश्वासः श्रद्धा। मुमुक्षुत्वं च मोक्षेच्छा। एवंभूतः
प्रमाताऽधिकारी। शांतो दांत उपासीतेत्यादिश्रुतेः। उक्तं च। प्रशांतचित्ताय
जितेंद्रियाय प्रहीणदोषाय यथोक्तकारिणे। गुणान्वितायानुगताय सर्वदा राम. २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्चेदयमेतत्सनतंतु मुमुक्षुत्वे इति । विषयो जीवब्रह्मैक्यं शुद्धचैतन्यं प्रमेयं । तत्रैव वे
दांतानां तात्पर्यात् । संबंधस्तु तदैक्यप्रमेयस्य तत्प्रतिपादकोपनिषत्प्रमाणस्य च बो
ध्यबोधकभावलक्षणः । प्रयोजनं तु तदैक्यप्रमेयगताज्ञाननिवृत्तिः । स्वस्वरू
पानंदावाप्तिश्च । तरति शोकमात्मवित् ब्रह्मविद्ब्रह्मैव भवतीत्यादिश्रुतेः । अयमधिका
री जननमरणादिसंसारानलसंतप्तो दीप्तशिरा जलराशिमिवोपहारपा
णिः श्रोत्रियं ब्रह्मनिष्ठं गुरुमुपसृत्य तमनुसरति । समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्
इत्यादिश्रुतेः । स परमकृपयाध्यारोपापवादन्यायेनैनमुपदिशति । तस्मै स वि
द्वानुपपन्नाय सम्यक्प्रशांतचित्ताय प्राहेत्यादिश्रुतेः । असर्पभूतायां रज्जौ सर्पारोपवद्वस्तु
न्यवस्त्वारोपोऽध्यारोपः । वस्तु सच्चिदानंदानंताद्वयं ब्रह्म । अज्ञानादिसकल
जडसमूहोऽवस्तु । अज्ञानं तु सदसद्भ्यामनिर्वचनीयं त्रिगुणात्मकं ज्ञानविरो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वे.सा. ३ धिभावरूपं यत्किंचिदिति हि वदंति। अहमज्ञ इत्यनुभवात्। देवात्मशक्तिं स्वगुणैर्नि
रूढामित्यादिश्रुतेः। इदमज्ञानं समष्टिव्यष्ट्यभिप्रायेणैकमनेकमिति व्यवह्री
यते। तथाहि। यथा वृक्षाणां समष्ट्यभिप्रायेण वनमित्येकत्वव्यपदेशः। यथा वा
जलानां समष्ट्यभिप्रायेण जलाशय इति। तथा नानात्वेन प्रतिभासमानानां
जीवगतानामज्ञानानां समष्ट्यभिप्रायेण तदेकत्वव्यपदेशः। अजामेकामि
त्यादिश्रुतेः। इयं समष्टिरुत्कृष्टोपाधितया विशुद्धसत्वप्रधाना। एतदुपहितं
चैतन्यं सर्वज्ञत्वसर्वेश्वरत्वसर्वनियंतृत्वादिगुणकमव्यक्तमंतर्यामी जग
त्कारणमीश्वर इति च व्यपदिश्यते। सकलाज्ञानावभासकत्वात्। यः सर्वज्ञः स
र्वविदिति श्रुतेः। ईश्वरस्येयं समष्टिरखिलकारणत्वात्कारणशरीरमानंद
प्रचुरत्वात्कोशवदाच्छादकत्वाच्चानंदमयः कोशः। सर्वोपरमत्वात्सुषुप्तिः। अ राम. ३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तएव स्थूलसूक्ष्मप्रपंचलयस्थानमितिचोच्यते।। यथावनस्य व्यष्ट्यभिप्रायेण वृ
क्षा इत्यनेकत्वव्यपदेशः।। यथा वा जलाशयस्य व्यष्ट्यभिप्रायेण जलानीति।। तथा
अज्ञानस्य व्यष्ट्यभिप्रायेण तदनेकत्वव्यपदेशः।। इंद्रो मायाभिः पुरुरूप ईयते इ
त्यादिश्रुतेः।। अत्र व्यस्तसमस्तव्यापित्वेन व्यष्टिसमष्टिताव्यपदेशः।। इयं व्यष्टि
र्निकृष्टोपाधितया मलिनसत्वप्रधाना।। एतदुपहितं चैतन्यमल्पज्ञत्वानीश्व
रत्वादिगुणकं प्राज्ञ इत्युच्यते। एकाज्ञानावभासकत्वात्।। अस्य प्राज्ञत्वं निकृष्टो स्य
पाधितयानतिप्रकाशकत्वात्।। अस्यापीयमहंकारादिकारणत्वात्कारणशरीर
मितिचोच्यते।। आनंदप्रचुरत्वात्कोशवदाच्छादकत्वादेवेदैतानंदमयकोशः।। स
र्वोपरमत्वात्सुषुप्तिः।। अत एव स्थूलसूक्ष्मशरीरलयस्थानमितिचोच्यते।। तदा
नीमेतावीश्वरप्राज्ञौ चैतन्यप्रदीप्ताभिरतिसूक्ष्माभिरज्ञानवृत्तिभिरानंदमनुभ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वे.सा. वतः। आनंदभुक् चेतोमुखः प्राज्ञ इत्यादिश्रुतेः। सुखमहमस्वाप्सं न किंचिदवे
४ षमित्युत्थितस्य परामर्शोपपत्तेश्च। अनयोः समष्टिव्यष्ट्योर्वनवृक्षयोरिव ज
लाशयजलयोरिव चाऽभेदः। एतदुपहितयोरीश्वरप्राज्ञयोरपि वनवृक्षावच्छि
न्नाकाशयोरिव जलाशयजलगतप्रतिबिंबाकाशयोरिव चाऽभेदः। एष सर्वे
श्वर इत्यादिश्रुतेः। वनवृक्षतदवच्छिन्नाकाशयोर्जलाशयजलगतप्रतिबिंबा
काशयोर्वा आधारानुपहिताकाशवदनयोरज्ञानतदुपहितचैतन्ययोराधार
प भूतं यदनुपहितचैतन्यं तत्तुरीयमित्युच्यते। शिवमद्वैतं चतुर्थं मन्यंते इत्यादि
श्रुतेः। इदमेव तुरीयं शुद्धचैतन्यमज्ञानादितदुपहितचैतन्याभ्यां तप्तायःपिंडवद
विविक्तं सन्महावाक्यस्य वाच्यं विविक्तं सल्लक्ष्यमिति चोच्यते। अस्याज्ञानस्या
वरणविक्षेपनामकमस्ति शक्तिद्वयं। आवरणशक्तिस्तावत् अल्पोपि मेघो राम. ४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऽनेकयोजनमायातमादित्यमंडलमवलोकयितृनयनपथपिधायकतया यथा
च्छादयतीव तथाऽज्ञानं परिछिन्नमप्यात्मानमपरिछिन्नमसंसारिणमवलो
कयितृबुद्धिपिधायकतया यथाच्छादयतीव तादृशं सामर्थ्यं। तदुक्तं। घनछन्नदृ
ष्टिर्घनछन्नमर्कं यथा मन्यते निःप्रभं चातिमूढः। तथा बद्धवद्भाति यो मूढदृष्टेः स
नित्योपलब्धिस्वरूपोहमात्मेति॥१॥ अनयैवावरणशक्त्याऽवछिन्नस्यात्मनः
कर्तृत्वभोक्तृत्वसुखदुःखमोहात्मकतुछसंसारसंभावनापि संभाव्यते। यथा
स्वाज्ञानेनावृतायां रज्जौ सर्पत्वं संभावयति। विक्षेपशक्तिस्तु। यथा रज्वज्ञानं स्वावृ
तरज्जौ स्वशक्त्या सर्पादिकं समुद्भावयति। एवमज्ञानमपि स्वावृतात्मनि वि
क्षेपशक्त्याऽऽकाशादिकं प्रपंचं समुद्भावयति तादृशं सामर्थ्यं। तदुक्तं। विक्षे
पशक्तिर्लिंगादिब्रह्मांडांतं जगत्सृजेदिति। शक्तिद्वयवदज्ञानोपहितं चैतन्यं स्वप्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वे.सा. धानतयानिमित्तंस्वोपाधिप्रधान्यततयोपादानंचभवति। यथाल्तूतातंतुस्वका
५ र्यंप्रति स्वप्रधानतयानिमित्तं स्वशरीरप्रधानतयोपादानं चभवति। तमःप्रधा
नविक्षेपशक्तिमदज्ञानोपहितचैतन्यादाकाशः। आकाशाद्वायुर्वायोरग्निर
ग्नेरापः अद्भ्यः पृथिवीचोत्पद्यते। एतस्मादात्मनआकाशः संभूतइत्यादिश्रु
तेः। तेषुजाड्याधिक्यदर्शनात्तमःप्राधान्यंतत्कारणस्य। तदानींसत्वरजतमांसिका
रणगुणप्रक्रमेणतेष्वाकाशादिषूत्पद्यंते। एतान्येवसूक्ष्मभूतानितन्मात्राणि
पंचीकृतानिचोच्यंते। एतेभ्यः सूक्ष्मशरीराणिस्थूलभूतानिचोत्पद्यंते। सूक्ष्म
शरीराणिसप्तदशावयवानिलिंगशरीराणि। अवयवास्तुज्ञानेंद्रियपंचकंबु
द्धिमनसीकर्मेंद्रियपंचकंवायुपंचकंचेति। ज्ञानेंद्रियाणिश्रोत्रत्वक्चक्षुर्जि
ह्वाघ्राणाख्यानि। एतानिपुनराकाशादीनांसात्विकांशेभ्योव्यस्तेभ्यः पृथक् राम. ५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्रमेणोत्पद्यंते। बुद्धिर्नाम निश्चयात्मिकांतःकरणवृत्तिः। मनो नाम संकल्पवि
कल्पात्मिकांतःकरणवृत्तिः। अनयोरेव चित्ताहंकारयोरंतर्भावः। एते पुनरा
काशादिगतसात्विकांशेभ्यो मिलितेभ्यो बुद्ध्यादय उत्पद्यंते। एतेषां प्रकाशात्मक
त्वात्सात्विकांशकार्यत्वं। इयं बुद्धिर्ज्ञानेंद्रियैः सहिता सती विज्ञानमयकोशो
भवति। अयं कर्तृत्वभोक्तृत्वसुखित्वदुःखित्वाद्यभिमानित्वेन इहलोकपरलोक
गामी व्यावहारिकजीव इत्युच्यते। मनस्तु कर्मेंद्रियैः सहितं सन्मनोमयको
शो भवति। कर्मेंद्रियाणि वाक्पाणिपादपायूपस्थाख्यानि। एतानि पुनराका
शादीनां रजोंशेभ्यो व्यस्तेभ्यः एकैकशः क्रमेणोत्पद्यंते। तत्रायं क्रमः। आ
काशाच्छ्रोत्रं वाचो। वायोस्त्वक्पाणी। तेजसश्चक्षुः पादौ। अभ्यो जिह्वोपस्थौ
। पृथ्वी घ्राणपायिंद्रिये। वायवः। प्राणापानव्यानादानसमानाः। प्राणो ना

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वे.सा. मग्रगामनवान्नासाग्रस्थानवर्त्ती। अपानो नाम अवागमनवान् पाय्वादिस्था
६ नवर्त्ती। व्यानो नाम विष्वग्गमनवानखिलशरीरवर्त्ती। उदानो नाम कंठस्थानी
यऊर्द्धगमनवानुत्क्रमणवायुः समानो नाम शरीरमध्यगतअशितपीतान्न
पानादिसमीकरणकरः। केचित्तु नागकूर्मकृकलदेवदत्तधनंजयाख्याः पंचा
न्ये वायवः संतीति वदंति। तत्र नाग उद्गिरणकरः। कूर्म उन्मीलनकरः। कृकलः क्षुत्क
रः। देवदत्तो विजृंभणकरः। धनंजयः पोषणकरः। एतेषां प्राणादिष्वंतर्भावात्प्रा
णादयः पंचैवेति केचित्। एवं प्राणादिपंचकमाकाशादिगतरजोंशेभ्यो मिलितेभ्य
उत्पद्यते। इदं प्राणादिपंचकं कर्मेंद्रियैः सहितं सत् प्राणमयकोशो भवति। अ
स्य क्रियात्मकत्वेन रजोंशकार्यत्वं। एतेषु कोशेषु मध्ये विज्ञानमयकोशो ज्ञा
नशक्तिमान्कर्तृरूपः मनोमयकोश इच्छाशक्तिमान्करणरूपः प्राणमय राम.
६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कोशः क्रियाशक्तिमान् कार्यरूपः । योग्यत्वादेवमेतेषां विभागमिति वर्णयंति । एतत्को
शत्रयं मिलितं सत् सूक्ष्मशरीरमित्युच्यते । अत्राप्यखिलसूक्ष्मशरीरमेकबुद्धिविषय
तया वनवज्जलाशयवद्वा समष्टिः । अनेकबुद्धिविषयतया वृक्षवज्जलवद्वा व्यष्टिर
पि भवति । एतत्समष्ट्युपहितं चैतन्यं सूत्रात्मा हिरण्यगर्भः प्राण इत्युच्यते । सर्वत्रा
नुस्यूतत्वात् ज्ञानेच्छाक्रियाशक्तिमदुपहितत्वाच्च । अस्यैषा समष्टिः स्थूलप्रपंचापे
क्षया सूक्ष्मत्वात् सूक्ष्मशरीरं विज्ञानमयादिकोशत्रयं जाग्रद्वासनामयत्वात् स्वप्नः । अ
त एव स्थूलप्रपंचलयस्थानमिति चोच्यते । एतद्व्यष्ट्युपहितं चैतन्यं तैजसो भवति । ते
जोमयांतःकरणोपहितत्वात् । अस्यापीयं व्यष्टिः स्थूलशरीरापेक्षया सूक्ष्मत्वादि
ति हेतोरेव सूक्ष्मशरीरं विज्ञानमयादिकोशत्रयं जाग्रद्वासनामयत्वात् स्वप्नः । अ
त एव स्थूलशरीरलयस्थानमिति चोच्यते । एतौ सूत्रात्मतैजसौ तदानीं मनोवृत्ति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वे.सा. भिः स्थूलसूक्ष्मविषयाननुभवतः॥ प्रविविक्तभुक्तैजस इत्यादिश्रुतेः॥ अत्रापि समष्टिव्य
७ ष्ट्योस्तदुपहितसूत्रात्मतैजसयोर्वनवृक्षवत्तदवच्छिन्नाकाशवच्च जलाशयजल
वत्तद्गतप्रतिबिंबाकाशवच्चाभेदः॥ एवं सूक्ष्मशरीरोत्पत्तिः॥ स्थूलभूतानि तु पंचीकृ
तानि॥ पंचीकरणं तु आकाशादिपंचस्वेकैकं द्विधा समं विभज्य तेषु दशसु भागेषु
प्राथमिकान् पंचभागान् प्रत्येकं चतुर्धा समं विभज्य तेषां चतुर्णां भागानां स्वस्वद्विती
यार्द्धभागपरित्यागेन भागांतरेषु योजनं॥ तदुक्तं॥ द्विधा विधाय चैकैकं चतुर्धा प्र
थमं पुनः॥ स्वस्वेतरद्वितीयांशैर्योजनं पंच पंच ते॥ इति॥ १॥ अस्याप्रामाण्यं न संकनीयं॥
त्रिवृत्करणमिति श्रुतेः॥ पंचीकरणस्याप्युपलक्षणत्वात्॥ पंचानां पंचात्मकत्वे समाने
ऽपि तेषु च वैशेष्यात्तद्वादस्तद्वाद इति न्यायेन आकाशादिव्यपदेशः संभवति॥ तदानी
माकाशे शब्दोऽभिव्यज्यते॥ वायौ शब्दस्पर्शौ अभिव्यज्येते॥ अग्नौ शब्दस्पर्शरूपाणि॥ राम.
७

15

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अप्सु शब्दस्पर्शरूपरसाः। पृथिव्यां शब्दस्पर्शरूपरसगंधाश्च। एतेभ्यः पंचीकृते
भ्यो भूतेभ्यो भूर्भुवःस्वर्महर्जनस्तपःसत्यमित्येतन्नामकादीनां लोकानामुपर्यु
परि विद्यमानानां लोकानां ब्रह्मांडस्य चतुर्विधस्थूलशरीराणां तदुचितानामन्न
पानादीनां चोत्पत्तिर्भवति। चतुर्विधशरीराणि तु। जरायुजांडजोद्भिज्जस्वेदजानि
जरायुभ्यो जातानि मनुष्यपश्वादीनि। अंडजानि अंडेभ्यो जातानि पक्षिपन्नगादीनि
।उद्भिज्जानि भूमिमुद्भिद्य जातानि कदलवृक्षादीनि। स्वेदजानि प्रस्वेदेभ्यो जातानि यूक
मस्तकादीनि। अत्रापि चतुर्विधसकलस्थूलशरीरमेकानेकबुद्धिविषयतया वनवज्ज
लाशयवद्वा समष्टिः। वृक्षवज्जलवद्वा व्यष्टिरपि भवति। एतत्समष्ट्युपहितं चैतन्यं वै
श्वानरो विराडित्युच्यते। सर्वनराभिमानित्वाद्विविधराजमानत्वाच्च। अस्यैषा सम
ष्टिः स्थूलशरीरं अन्नविकारित्वादन्नमयकोशः। स्थूलभोगायतनत्वाच्च स्थूल
शरीरं जाग्रच्चेति व्यपदिश्यते। एतद्व्यष्ट्युपहितं चैतन्यं विश्व इत्युच्यते। सूक्ष्मशरी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वे·सा· ८

राभिमानं परित्यज्य स्थूलशरीरेषु प्रविष्टत्वात्। अस्याप्येषा व्यष्टिः स्थूलशरीरम
न्नविकारित्वादेव हेतोरन्नमयकोशो जाग्रदिति चोच्यते। तदानीमेतौ विश्ववैश्वा
नरौ दिग्वातार्कवरुणाश्विभिः क्रमान्नियंत्रितेन श्रोत्रादींद्रियपंचकेन क्रमाच्छ
ब्दस्पर्शरूपरसगंधान्। अग्नींद्रोपेंद्रयमप्रजापतिभिः क्रमान्नियंत्रितेन वा
गादींद्रियपंचकेन क्रमाद्वचनादानगमनविसर्गानंदादीनचंद्रचतुर्मुखशं
कराच्युतैः क्रमान्नियंत्रितेन मनोबुद्ध्यहंकारचित्ताख्येनांतरिंद्रियचतुष्केण क्र
मात्संकल्पनिश्चयाहंकार्यचैत्तांश्च सर्वानेतान् स्थूलविषयाननुभवतः। जा
गरितस्थानो बहिःप्रज्ञः इत्यादिश्रुतेः। अत्राप्यनयोः स्थूलव्यष्टिसमष्ट्योस्तदुप
हितविश्ववैश्वानरयोश्च वनवृक्षवत्तदवच्छिन्नाकाशवच्च जलाशयजलवत्तद्ग
तप्रतिबिंबाकाशवच्च पूर्ववदभेदः। एवं पंचीकृतभूतेभ्यः स्थूलप्रपंचोत्पत्तिः। एतेषां
स्थूलसूक्ष्मकारणशरीरप्रपंचानामपि समष्टिरेको महान् प्रपंचो भवति। यथा

राम· ८

16

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वांतरवनानां समष्टिरेकं महद्वनं भवति । यथा वांतरजलाशयानां समष्टिरेको महा
न् जलाशयः एतदुपहितं वैश्वानरादीश्वरपर्यंतं चैतन्यमप्यवांतरवनावच्छिन्ना
काशवद्वांतरजलाशयगतप्रतिबिंबाकाशवच्चैकमेव । आभ्यां महत्प्रपंच तदुप
हितचैतन्याभ्यां तप्तायःपिंडवदविविक्तं सदनुपहितं चैतन्यं सर्वं खल्विदं ब्रह्मे
ति वाक्यस्य वाच्यं भवति । विविक्तं सल्लक्ष्यमपि भवति । एवं वस्तुन्यवस्त्वारोपोऽध्या
रोपः सामान्येन प्रदर्शितः । इदानीं प्रत्यगात्मनिदमिदमयमयमारोपयतीति वि
शेषत उच्यते । अतिप्राकृतस्त्वात्मा वै पुत्रनामसीत्यादिश्रुतेः । स्वस्मिन्निव स्वपुत्रेऽ
पि प्रेमदर्शनात् पुत्रे पुष्टे नष्टे चाहमेव पुष्टो नष्टश्चेत्याद्यनुभवाच्च पुत्रमात्मेति
वदति । चार्वाकस्तु स वा एष पुरुषोऽन्नरसमय इत्यादिश्रुतेः । प्रदीप्तगृहात्स्वपुत्रंप
रित्यज्यापि स्वस्य निर्गमनदर्शनात् । स्थूलोहं कृशोहमित्याद्यनुभवाच्च स्थूलशरी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वे.सा. रीरमात्मेति वदति। अपरश्चार्वाकः इंद्रियाणि प्रजापतिं समेत्य ब्रुयुरित्यादिश्रुतेः

। इंद्रियाणामभावे शरीरचलनाभावात् काणोहं बधिरोहमित्याद्यनुभवाच्च इंद्रियाण्या

त्मेति वदति। अपरश्चार्वाकोऽन्योंतर आत्मा प्राणमय इत्यादिश्रुतेः। प्राणाभावे इंद्रिया

दिचलनायोगात्। अहमशनावान् अहं पिपासावानित्याद्यनुभवाच्च प्राण आत्मेति व

दति। अन्यस्तु चार्वाकोऽन्योंतर आत्मा मनोमय इत्यादिश्रुतेः। मनसि सुप्ते प्राणापाना

देरभावात्। अहं संकल्पवानहं विकल्पवानित्याद्यनुभवाच्च मन आत्मेति वदति

। बौद्धस्त्वन्योंतर आत्मा विज्ञानमय इत्यादिश्रुतेः। कर्तुरभावे करणस्य शक्त्यभावा

त्। अहं भोक्तेत्याद्यनुभवाच्च बुद्धिरात्मेति वदति। प्राभाकरतार्किकौ अन्योंतर आत्मा

अज्ञानमय इत्यादिश्रुतेः। बुद्ध्यादीनामज्ञाने लयदर्शनात्। अहमज्ञोऽहमज्ञा

नीत्याद्यनुभवाच्च अज्ञानमात्मेति वदति। भाट्टास्तु प्रज्ञानघन एवानंदमय इत्या राम.

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दिश्रुतेः। सुषुप्तौ प्रकाशाप्रकाशासम्भवात्। मामहं न जानामीत्याद्यनुभवाच्च अ
ज्ञानोपहितं चैतन्यमात्मेति वदति। ८ अपरो बौद्धः असदेवेदमग्र आसीदित्यादि
श्रुतेः। सुषुप्तौ सर्वाभावः अहं सुषुप्तौ नासमित्युत्थितस्य स्वाभावपरामर्शवि
षयानुभवाच्च शून्यमात्मेति वदति। एतेषां पुत्रादीनां शून्यपर्यंतानामनात्मत्व
मुच्यते। एतैरतिप्राकृतवादिभिरुक्तेषु श्रुतियुक्त्यनुभवाभासेषु पूर्वपूर्वोक्तश्रुतियु
क्त्यनुभवाभासानामुत्तरोत्तरश्रुतियुक्त्यनुभवाभासैर्बाधदर्शनात्पुत्रादीनाम
नात्मत्वं स्पष्टमेव। किं च प्रत्यगस्थूलोऽचक्षुरप्राणोऽमना अकर्ता चैतन्यं चिन्मा
त्रं सदित्यादिप्रबलश्रुतिविरोधादस्य पुत्रादिशून्यपर्यंतस्य जडस्य चैतन्यभास
केन घटादिवदनित्यत्वात्। अहं ब्रह्मेति विद्वदनुभवप्राबल्याच्च तत्तच्छ्रुतियुक्त्य
नुभवाभासानां बाधितत्वादपि पुत्रादिशून्यपर्यंतमखिलमनात्मैव। अतस्तान्भा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वे.सा.
१

सकलं निरस्य शुद्धबुद्धमुक्तसत्यस्वरूपं भावं प्रत्यक्चैतन्यमेवात्मवस्तु इति वेदांत
विद्वदनुभवः। एवमध्यारोपः। अपवादो नाम रज्जुविवर्तस्य सर्पस्य रज्जुमात्रत्व
वत् वस्तुविवर्तस्यावस्तुनोऽज्ञानादेः प्रपंचस्य वस्तुमात्रत्वं। तथाहि। एतद्भो
गायतनं चतुर्विधसकलस्थूलशरीरजातं भोग्यरूपान्नपानादिकं एतदाश्रय
भूतं भूरादिचतुर्दशभुवनानि एतदाश्रयभूतं ब्रह्मांडं चैतत्सर्वमेतेषां का
रणभूतं पंचीकृतभूतमात्रं भवति। अज्ञानादिव्यष्टिरेतदुपहितात्माभासादिविशिष्ट
चैतन्यमेतदनुपहितं चैतन्यत्रयं तप्तायःपिंडवत् एकत्वेनावभासमानं त्वंपदवाच्या
र्थो भवति। एतानि शब्दादिविषयसहितानि पंचीकृतभूतजातानि सूक्ष्मशरी
रजातमेतत्सर्वमेतेषां कारणभूतापंचीकृतभूतमात्रं भवति। एतानि सत्वादिगुण
सहितानि अपंचीकृतानि उत्पत्तिव्युत्क्रमेणैतत्कारणभूताज्ञानोपहितं चैत

राम
१

K K S U LIBRARY
RAMTEK
441 106
M-1536
Dist. Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्यमात्रं भवति। एतदपि तत्सर्वमज्ञानोपहितं चैतन्यं चेश्वरादिकं। एतदाधारभूतानु
पहितं चैतन्यं तुरीयं ब्रह्ममात्रं भवति। आभ्यामध्यारोपापवादाभ्यां तत्त्वंपदार्थशोध
नमपि सिद्धं भवति। तथाहि। अज्ञानादिसमष्टिरेतदुपहितं सर्वज्ञत्वादिविशिष्टं चैत
न्यं एतदनुपहितं चैतन्यमेतत्त्रयं तप्तायःपिंडवदेकत्वेनावभासमानं तत्पदवाच्यार्थो
भवति। एतदुपाध्युपहिताधारभूतमनुपहितं चैतन्यं तत्पदलक्ष्यार्थो भवति। एतदुपा
ध्युपहिताधारभूतमनुपहितं प्रत्यगानंदं तादृपं तुरीयं चैतन्यं त्वंपदलक्ष्यार्थो भवति। अ
थमहावाक्यार्थो वर्ण्यते। इदं तत्त्वमसिवाक्यं संबंधत्रयेणाखंडार्थबोधकं भवति। संबं
धत्रयं नाम पदयोः सामानाधिकरण्यं पदार्थयोर्विशेषणविशेष्यभावः प्रत्यगात्मल
क्ष्ययोर्लक्ष्यलक्षणभावश्चेति। तदुक्तं। सामानाधिकरण्यं च विशेषणविशेष्यता लक्ष्य
लक्षणसंबंधः पदार्थप्रत्यगात्मनामिति। सामानाधिकरण्यसंबंधस्तावत्। यथा सोयं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥वे॰सा॰ देवदत्तइत्यस्मिन्वाक्ये सशब्दार्थे तत्कालविशिष्टदेवदत्तस्य अयंशब्दार्थे तत्कालविशि
॥११॥ ष्टदेवदत्तस्य चैकस्मिन्पिंडे तात्पर्यसंबंधः॥ तथा तत्त्वमसिवाक्येऽपि परोक्षत्वादिविशि
ष्टचैतन्यवाचकतत्पदस्यापरोक्षत्वादिविशिष्टचैतन्यवाचकत्वंपदस्य चैकस्मिन्चैत
न्ये तात्पर्यसंबंधः। विशेषणविशेष्यभावसंबंधस्तु। यथा तत्रैव वाक्ये सशब्दार्थत
त्कालविशिष्टदेवदत्तस्यायंशब्दार्थैतत्कालविशिष्टदेवदत्तस्य च अन्योन्यभेदव्या
वर्तकतया विशेषणविशेष्यभावः। लक्ष्यलक्षणसंबंधस्तु॥ यथा तत्र सशब्दा
यंशब्दयोस्तदर्थयोर्वा विरुद्धतत्कालैतत्कालविशिष्टत्वपरित्यागेनाविरु
द्धदेवदत्तेन सह लक्ष्यलक्षणभावः॥ तथात्रापि तत्त्वंपदयोस्तदर्थयोर्वा वि
नि रुद्धपरोक्षत्वापरोक्षत्वादिविशिष्टत्वपरित्यागेनाविरुद्धचैतन्येन सह लक्ष्य ॥ राम
लक्षणभावः॥ इयमेव भागलक्षणेत्युच्यते॥ अस्मिन्वाक्ये नीलमुत्पलमि ॥११॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ति वाक्यवद्वाक्यार्थो न संगच्छते ॥ तत्र तु नीलपदार्थो नीलगुणस्य उत्पलपदा
र्थ उत्पलद्रव्यस्य च शौक्ल्यपटादिव्यावर्तकतयान्योन्यविशेषणविशेष्य
भावसंसर्गस्यान्यतरविशिष्टस्यान्यतरस्य वा तदैक्यस्य वा वाक्यार्थ
त्वांगीकारे प्रमाणांतरविरोधाभावाद्वाक्यार्थः संगच्छते ॥ अत्र तु तदर्थ
परोक्षत्वादिविशिष्टचैतन्यस्य त्वमर्थापरोक्षत्वादिविशिष्टचैतन्येन चान्यो
न्यभेदव्यावर्तकतया विशेषणविशेष्यभावसंसर्गस्यान्यतरविशिष्टस्या
न्यतरस्य वा तदैक्यस्य वा वाक्यार्थत्वांगीकारे प्रत्यक्षादिप्रमाणविरोधाद्वा
क्यार्थो न संगच्छते ॥ अत्र तु गंगायां घोषो वसतीति वाक्यवत् ॥ जहल्लक्ष
णा न संगच्छते ॥ तत्र गंगाघोषयोः आधाराधेयभावलक्षणस्य वाक्यार्थ
स्याशेषतो विरुद्धत्वात् वाच्यार्थमशेषं परित्यज्य तत्संबंध्यतीरलक्ष
णाया युक्तत्वाज्जहल्लक्षणा संगते ॥ अत्र तु परोक्षापरोक्षचैतन्यक

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥वे·सा·॥ त्वलक्षणस्य वाक्यार्थस्य भागमात्रे विरोधात् भागांतरमपि परित्यज्यान्यल
॥१२॥ क्षणाया अयुक्तत्वाज्जहल्लक्षणा न संगच्छते॥ न च गंगापदं स्वार्थपरित्यागे
न तीरपदार्थं यथा लक्षयति॥ तथा तत्पदं त्वंपदं वा स्वार्थपरित्यागेन तत्पदा
र्थं त्वंपदार्थं वा लक्षयतु॥ अतः कुतो जहल्लक्षणा न संगच्छते॥ इति वा
च्यं॥ तत्र तीरपदाश्रवणेन तदर्थाप्रतीतौ लक्षणया तत्प्रतीत्यपेक्षाया
मपि॥ अत्र तु तत्त्वंपदयोः श्रूयमाणत्वेन तदर्थप्रतीतौ लक्षणया पुनः
न्य अँतरपदेनान्यतरपदार्थप्रतीत्यपेक्षाभावात्॥ अत्र शोणो धावतीति
वाक्यवत् अजहल्लक्षणापि न संभवति॥ तत्र शोणगुणगमनलक्ष
णस्य वाक्यार्थस्य विरुद्धत्वात्तदपरित्यागेन तदाश्रयाश्वादिलक्षणया तद्वि
रोधपरिहारसंभवादहल्लक्षणासंभवति॥ अत्र तु परोक्षत्वापरोक्षत्वा ॥राम॥
दिविशिष्टचैतन्यैकत्वस्य वाक्यार्थस्य विरुद्धत्वात्तदपरित्यागेन तत्संबंधि ॥१२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नोयस्यकस्यचिदर्थस्यलक्षितत्वेपितद्विरोधापरिहारादजहल्लक्षणानसं
भवत्येवननु तत्त्वंपदवाच्यार्थविरुद्धांशापरित्यागेनांशांतरसहितंतत्
पदार्थंत्वंपदार्थं वा लक्षयतु॥अतः कथं प्रकारांतरेणभागलक्षणांगीकरण
मितिवाच्यं॥एकेनपदेनस्वार्थांशपदार्थांतरोभयलक्षणाया असंभवात्॥
पदांतरेण तदर्थप्रतीतेः लक्षणयापुनस्तत्प्रतीत्यपेक्षाभावाच्च॥तस्माद्य
थासोयंदेवदत्तइतिवाक्यंतदर्थोवातत्कालैतत्कालविशिष्टदेवदत्तलक्षणस्यवाक्यार्थ
स्यांशेविरोधाद्विरुद्धतत्कालैतत्कालविशिष्टत्वांशंपरित्यज्याविरुद्धदेवदत्तांशमात्रंल
क्षयतीति॥तथातत्त्वमसिवाक्यंतदर्थोवापरोक्षत्वापरोक्षत्वादिविशि
ष्टचैतन्यैकत्वलक्षणस्यवाक्यार्थस्यांशेविरोधात्विरुद्धपरोक्षत्वादिवि
शिष्टत्वांशंपरित्यज्याविरुद्धमखंडचैतन्यमात्रंलक्षयतीति॥अथाहंब्रह्मा
स्मीतिवाक्यार्थोवर्ण्यते।एवमाचार्येणाध्यारोपापवादपुरःसरंतत्त्वंपदार्थौ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वे०सा० शोधयीत्वावाक्येनाखंडार्थोवबोधिते अधिकारिणोऽहंनित्यशुद्धबुद्धमुक्त
सत्यस्वभावपरमानंदानंताद्वयंब्रह्मास्मीत्यखंडाकाराकारिताचित्तवृत्तिरुदेति॥
॥१३॥ सातुचित्प्रतिबिंबसहितासतीप्रत्यगभिन्नमज्ञातंपरंब्रह्मविषयीकृत्यतद्गता
ज्ञानमेवबाधते॥तदापटकारणतंतुदाहेपटदाहवदखिलकारणेऽज्ञानेबा
धितेसतितत्कार्यस्याखिलस्यबाधितत्वात्तदंतर्भूताखंडाकाराकारिता
चित्तवृत्तिरपिबाधिताभवतितत्रप्रतिबिंबितंचैतन्यमपियथादीपप्रभादित्य
प्रभावभासनासमर्थासतितथाभिभूता-भवति॥तथास्वयंप्रकाशमानप्रत्यग
भिन्नपरब्रह्मावभासनाऽनर्हतयातेनाभिभूतंसत्स्वोपाधिभूताखंडचित्तवृ
त्तेर्बाधितत्वाद्दर्पणाभावेमुखप्रतिबिंबस्यमुखमात्रत्ववत्प्रत्यगभिन्नपरब्र ॥१२॥
ह्ममात्रंभवति॥एवंचसतिमनसैवानुद्रष्टव्यं॥यन्मनोनमनुतइत्यविरोधः॥वृ ॥राम॥
त्तिव्याप्यत्वांगीकारेणफलव्याप्यत्वप्रतिषेधप्रतिपादनात्॥तदुक्तं॥फलव्याप्यत्व

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मेवास्यशास्त्रकृद्भिर्निवारितंब्रह्मण्यज्ञाननाशायवृत्तिव्याप्तिरपेक्षता॥स्वयंप्रकाशमा
नत्वान्नाभासउपयुज्यतइति॥बुद्धि।तत्स्थश्चिदाभासौद्वावपिव्याप्नुतोघटं॥तत्राज्ञानंधि
यानश्येदाभासेनघटःस्फुरेत्॥जडपदार्थाकाराकारितचित्तवृत्तेविशेषोऽस्तितथाहि॥
अयंघटइतिघटाकाराकारितचित्तवृत्तिरज्ञातंघटंविषयीकृत्यतद्गताज्ञाननिरसन
पुरःसरंस्वगतचिदाभासेनाजडंघटमपिभासयति॥यथादीपप्रभामंडलंअंधकारग
तंघटपटादिकंविषयीकृत्यतद्गतांधकारनिरसनपुरःसरंस्वप्रभयातदपिभासयति॥
एवंभूतस्वरूपचैतन्यसाक्षात्कारपर्यंतंश्रवणमनननिदिध्यासनसमाध्यनुष्ठानस्या
पेक्षितत्वात्तेपिप्रदर्श्यंते॥श्रवणंनाम॥षड्विधलिंगैरशेषवेदांतानामद्वितीयवस्तुनि
तात्पर्यावधारणं॥लिंगानितु॥उपक्रमोपसंहारावभ्यासोऽपूर्वताफलार्थवादोपपत्त्या
ख्यानितत्रप्रकरणप्रतिपाद्यस्यार्थस्यतदाद्यंतयोरुपपादनमुपक्रमोपसंहारौ॥यथो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वे०सा० छांदोग्ये षष्ठेप्रपाठके प्रकणप्रतिपाद्यस्याद्वितीयवस्तुन एकमेवाद्वितीयमित्यादावैतदात्म्य
मिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतोइ संतेच प्रतिपादनं ॥ प्रकरणप्रतिपाद्य
॥१७॥ स्यार्थस्यतन्मध्येपौनःपुण्येन प्रतिपादनमभ्यासः ॥ तथा तत्रैवाद्वितीयवस्तुनोमध्ये
तत्त्वमसीति नवकृत्वः प्रतिपादनं ॥ प्रकरणप्रतिपाद्यस्यार्थस्य प्रमाणांतराविषयीक
रणं ॥ अपूर्वत्वं ॥ यथा तत्रैवाद्वितीयवस्तुनो मानांतराविषयीकरणं फलंतु ॥ प्रकर
णप्रतिपाद्यात्मज्ञानस्य तदनुष्ठानस्य वा तत्र तत्र श्रूयमाण प्रयोजनं ॥ यथा तत्राचार्य
वान्पुरुषो वेदतस्य तावदेवचिरं यावन्नविमोक्ष्येथ संपत्स्यइति अद्वितीयवस्तु ज्ञा
नस्य तत्प्राप्तिः प्रयोजनं श्रूयते करणप्रतिपाद्यस्यार्थस्य तत्र तत्र प्रशंसनमर्थवादः यथा त ॥ सांव ॥
त्रोततमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञानं विज्ञातमित्यद्वितीयवस्तु ॥१८॥
प्रशंसनं ॥ प्रकरणप्रतिपाद्यस्यार्थस्य साधने तत्र तत्र श्रूयमाणा युक्तिरुपपत्तिः ॥ यथा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्रसौम्यैकेनमृत्पिंडेनसर्वंमृन्मयंविज्ञातंस्याद्वाचारंभणंविकारोनामधेयंमृत्ति
केत्येवसत्यमित्याद्यावद्द्वितीयवस्तुन्येसोनेविकारस्यवाचारंभणमात्रत्वेयुक्तिःश्रूयते॥
मननंतु॥श्रुतस्याद्वितीयवस्तुनोवेदांतानुगुणयुक्तिभिरनवरतमनुचिंतनं॥विजाती
यदेहादिप्रत्ययरहिताद्वितीयवस्तुसजातीयप्रत्ययप्रवाहोनिदिध्यासनं॥समाधि
र्द्विविधः॥सविकल्पकोनिर्विकल्पकश्चेति॥तत्रसविकल्पोनाम॥ज्ञातृज्ञाना
दिविकल्पलयानपेक्षयाऽद्वितीयवस्तुनितदाकाराकारितायाश्चित्तवृत्तेरव
स्थानं॥तदामृन्मयगजादिभानेपिमृद्भानवद्द्वैतभानेप्यद्वैतवस्तुभासते॥त
दुक्तमभिनयेनदर्शयति॥दृशिस्वरूपंगगनोपमंपरंसकृद्विभातंत्वजमे[illegible]
कमक्षरं॥अलेपकंसर्वगतंयदद्वयंतदेवचाहंसततंविमुक्त[illegible]मिति॥निर्विक
ल्पकस्तु॥ज्ञातृज्ञानादिविकल्पलयापेक्षयाऽद्वितीयवस्तुनितदाकाराका

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सवें०सारितायाश्चित्तवृत्तेरतितरामेकीभावनावस्थानं॥नदीजलाकाराकारितलवणानवभा
सेनजलमात्रावभासवत् अद्वितीयवस्त्वाकाराकारितचित्तवृत्त्यनवभासेनाद्वितीय
॥१५॥ वस्तुमात्रमवभासते॥ततश्चास्याः सुषुप्तादभेदशंका न भवति॥उभयत्रवृ समाने
समानेपि बुद्धिवत तत्सद्भावमात्रेण तयोर्भेदोपपत्तेः॥अस्यांगानि॥यमनियमासनप्रा
णायामप्रत्याहारधारणाध्यानसमाधयः॥तत्राहिंसासत्यास्तेयब्रह्मचर्यापरिग्र
हाः यमाः॥शौचसंतोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः॥करचरणादि
संस्थानविशेषलक्षणानि पद्मकस्वस्तिकादीन्यासनानि॥रेचककुंभकपूरक
लक्षणाः प्राणनिग्रहोपायाः प्राणायामाः॥इंद्रियाणां स्वस्वविषयेभ्यः प्रत्याहरणं सांब
प्रत्याहारः अद्वितीयवस्तुन्यंतरिंद्रियवृत्तिधारणं धारणा॥तत्राद्वितीयवस्तुनि १५
विछिद्य विछिद्यांतरिंद्रियप्रवाहो ध्यानं॥समाधिस्तूक्तलक्षणः सविकल्पक एव॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अस्यां गिनो निर्विकल्पकस्य लयविक्षेपकषायरसास्वादलक्षणाश्चत्वारो विघ्नाः संभ
वंति॥ लयस्तावदखंडवस्त्ववलंबनेन चित्तवृत्तेर्निद्रा॥ अखंडवस्त्वानवलंबनेन चि
त्तवृत्तेरन्यावलंबनं विक्षेपः॥ लयविक्षेपाभावेपि चित्तवृत्ते रागादिवासनया स्तब्धी
भावादखंडवस्त्वनवलंबनं कषायः॥ अखंडवस्त्वनवलंबनेनापि चित्तवृत्तेः स बित ४
विकल्पकानंदास्वादनं रसास्वादः॥ समाध्यारंभसमये सविकल्पकानंदास्वा
दनं वा॥ अनेन विघ्नचतुष्टयेन विरहितं चित्तं निर्वातदीपवदचलं सदखंडचैतन्य
मात्रमवतिष्ठते यदा तदा निर्विकल्पकः समाधिरित्युच्यते॥ तदुक्तं॥ लये संबोधये
च्चित्तं विक्षिप्तं शमयेत्पुनः सकषायं विजानीयात् शमप्राप्तं न चालयेत्॥१॥ नास्वा
दयेद्रसं तत्र निःसंगः प्रज्ञया भवेत् इति॥ यथा दीपो निवातस्थो नेंगते सोपमा स्मृ
तेति॥ अथ जीवन्मुक्तलक्षणमुच्यते॥ जीवन्मुक्तो नाम॥ स्वस्वरूपाखंडब्रह्मज्ञा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सा०

नेन तदज्ञानबाधनद्वारा स्वस्वरूपाखंडब्रह्मणि साक्षात्कृते ऽज्ञानतत्कार्यसंचितक
र्मसंशयविपर्ययाणामपि बाधितत्वात्प्रारब्धकर्ममात्रशेषः अखिलबंधरहितो ब्र
॥१६॥ ह्मनिष्ठः॥ भिद्यते हृदयग्रंथिश्छिद्यंते सर्वसंशयाः॥ क्षीयंते चास्य कर्माणि तस्मिन्दृ
ष्टे परावरे इत्यादिश्रुतेश्च॥ अयं तु व्युत्थानसमये मांसशोणितमूत्रपुरीषादिभा
जनेन शरीरेण आंध्यमांद्यपटुत्वादिभाजनेनेंद्रियग्रामेण अशनायापिपासाभाज
नेन प्राणेन शोकमोहादिभाजनेनांतःकरणेन च पूर्वपूर्ववासनया क्रियमा
णानि च कर्माणि भुज्यमानानि च ज्ञानविरुद्धारब्धफलानि च साक्षितया प
श्यन्नपि बाधितत्वात्परमार्थतो न पश्यति॥ यथेंद्रजालमिति ज्ञानवांस्तदिंद्रजा ॥ सा०ब॥
लं पश्यन्नपि परमार्थमिदमिति न पश्यति॥ सचक्षुरचक्षुरिव सकर्णोऽकर्ण इ ॥१६॥
वेत्यादिश्रुतेः॥ उक्तं च॥ सुषुप्तिवज्जाग्रति यो न पश्यति द्वयं तु पश्यन्नपि चाद्वय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यत्नतः॥ तथापि कुर्वन्नपि निष्क्रियश्चयः स आत्मविन्नान्यदितीह निश्चयः॥ अस्य ज्ञा
नात्पूर्वं विद्यमानानामेवाहारादीनामनुवृत्तिर्वत्सुभवासनानामेवानुवृत्तिर्भव
ति॥ शुभाशुभयोरोदासिन्यं वा॥ तदुक्तं॥ बुद्धाद्वैतसतत्वस्य यथेष्टाचरणं यदि॥
शुनां तत्वदृशां चैव को भेदोऽशुचिभक्षणे॥ ब्रह्मविदुत्तया मुक्तः स आत्मज्ञो न चे
तर इति तदानीममानित्वादीनि ज्ञानसाधनानि अद्वेष्टृत्वादयो गुणाश्चालंकारवदनु
वर्तते॥ तदुक्तं॥ उत्पन्नात्मावबोधस्य ह्यद्वेष्टृत्वादयो गुणाः अयत्नतो भवंत्यस्य न तु
साधनरूपिण इति॥ किंबहुनाऽहं देहयात्रामात्रार्थमिच्छानिच्छापरेच्छाप्रापिता
नि सुखदुःखलक्षणान्यारब्धफलान्यनुभवन्नंतःकरणाभासादीनामवभासकः
सन् तदवसाने प्रत्यगानंदपरब्रह्मणि प्राणे लीने सत्यज्ञानतत्कार्यसंस्काराणा
मपि विनाशात्परमकैवल्यमानंदैकरसमखिलभेदप्रतिभासातीतमखंडब्रह्मा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥०॥ वतिष्ठते॥ न तस्य प्राणा उत्क्रामंत्यत्रैव समवलीयंते विमुक्तश्च विमुच्यते इत्येवमादिमा
श्रुतिः॥ ॥ सांब॥ ॥ इति विद्वान्सारः समाप्तः॥ ॥ शाके १७०१९ पिंगलनाम संवत्सरे
॥१७॥ माघ वद्य तृतीयां मंदवासरे पुस्तकं समाप्तं॥ शुभं भवतु॥ स्वार्थं परोपकारार्थं च॥
॥ श्रीमद्बद्दिस्थलक्ष्मीन्द्रसिंहार्पणमस्तु॥ ॥ शिवसांब॥ ॥ राम कृष्ण॥
॥५॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

इदं पुस्तकं घोलपोके पोय बाबा होरिकेण मौल्यं दत्वा गृहीतं नेत्रा श्यादिभस्या
केसाधारणा दुवेत्रा गाखबकुलपुस्त

सांबकृष्ण
॥१७॥

KKSU LIB[RARY]
RAMTE[K]
441 10[6]
1536
Dist. Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=25.08.20 14:59
,TRANSFERRED=2020/08/25 at 15:04:02
,PAGES=34
,TYPE=STD
,NAME=S0003546
,Book Name=M-1536-VEDANTSAR
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection